**CLASS : 12th Sr. Sec. (Academic)** **Code No. 2905**

**Series : SS-M/2016**

*रोल नं०* | | | | | | | | | | |

***SET : A***

# संस्कृत

# SANSKRIT

***ACADEMIC***

**1st SEMESTER**

(Only for Re-appear Candidates)

***( Morning Session )***

*समय : **2½** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **14** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***



Downloaded from cclchatper.com

*निर्देश :–*

*(i) प्रत्येकं खण्डमधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**(अपठित-अवबोधनम्)**

**1.** अधोलिखितम् अनुच्छेदं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – $2 \times 4 = 8$

भारतदेशः आ पूर्वकालात् मृगपक्षिसङ्कुलयुक्तः प्रकृतिरमणीयः देशः एव। अत्र बहुविधाः दक्षिणः आसन्। तेषु अनेकाः जातयः इदानीं नामावशेषतां गताः। अन्याः काश्चन् पक्षिजातयः ईषत् परिवर्तनेन कथञ्चित् प्राणान् धरन्त्यः जीवन्ति। ते नामान्तरैः इदानीं परिचिताः भवेयुः। रामायणं तमसानदीतीरस्थयोः क्रौञ्चपक्षिणोः निनादैः एव आरभ्यते।

(क) भारतदेशः कीदृशः देशः आ पूर्वकालात् ?

(ख) अत्र कतिविधाः पक्षिणः आसन् ?

(ग) रामायणं कस्य निनादैः आरभ्यते ?

(घ) ईषत् परिवर्तनेन कथञ्चित् प्राणान् धरन्त्यः के जीवन्ति ?



Downloaded from cclchatper.com

**खण्डः 'ख'**

**(रचनात्मक-कार्यम्)**

**2.** अधोलिखितेषु निबन्धेषु एकमधिकृत्य संस्कृतेन लिखत – 8

(क) मम विद्यालयः,

(ख) प्रातःकाल भ्रमणम्,

(ग) संस्कृतभाषायाः महत्त्वम्।

**खण्डः 'ग'**

**(पठित-अवबोधनम्)**

**3.** अधोलिखितगद्यांशस्य हिन्दीभाषायां व्याख्या कार्या – 4

अरण्यगर्भरूपालापैर्यूयं तोषिता वयं च। भगवति! जानामि तं पश्यन्ती वञ्चितेव। तस्मादितोऽन्यतो भूत्वा प्रेक्षामहे तावत् पलायमानं दीर्घायुषम्।

**4.** अधोलिखितश्लोकस्य हिन्दीभाषायां व्याख्या कार्या – 4

यावत्स्वस्थमिदं कलेवरगृहं यावच्च दूरे जरा,
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः।

**5.** अधोलिखितं गद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि सम्पूर्णवाक्येन लिखत – $2 \times 2 = 4$

आलोकयतु तावत् कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम्। न ह्येवंविधमपरिचितमिह जगति किञ्चिदस्ति यथेयमनार्या। लब्धापि खलु दुःखेन परिपाल्यते।



Downloaded from cclchatper.com

(क) अयं गद्यांशः कस्मात् पाठात् संकलितः ?

(ख) लब्धापि खलु केनपरिपाल्यते ?

**6.** अधोलिखितासु सूक्तिद्वयस्य भावं हिन्दीभाषायां लिखत – $2 \times 2 = 4$

(क) ततो भूय इव ते तमो य उ विद्यायां रताः।

(ख) शरद्घनं नार्दति चातकोऽपि ।

(ग) शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः।

**7.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुतः – $1 \times 2 = 2$

(क) अस्ति यद्यपि सर्वत्र नीरं नीरज-राजितम् ।

(ख) मरालस्य मानसं मानसं विना न रमते।

**खण्डः 'घ'**

**(संस्कृत-साहित्य-परिचयः)**

**8.** भवभूति-कालिदासयोः ***एकस्य*** जीवनकृतिविषयकः संक्षिप्तपरिचयः हिन्दीभाषायां लेख्यः। 4

**9.** अधोलिखितेषु कस्यापि ***एकस्य*** संक्षिप्तपरिचयः हिन्दीभाषायां देयः – 4

(i) रघुवंशम्,

(ii) ईशावास्योपनिषद्।



Downloaded from cclchatper.com

**खण्डः 'ङ'**

**(छन्दोऽलङ्कार-परिचयः)**

**10.** अधोलिखितेषु छन्देषुकयोरपि ***द्वयोः*** लक्षणोदाहरणौ संस्कृतभाषायां लिखत – $4 \times 2 = 8$

(i) गायत्री,

(ii) अनुष्टुप्,

(iii) इन्द्रवज्रा।

**11.** अधोलिखितेषु अलङ्कारेषु कयोरपि ***द्वयोः*** लक्षणोदाहरणौ संस्कृतभाषायां लिखत – $4 \times 2 = 8$

(i) यमकः,

(ii) रूपकः,

(iii) उपमा।

**खण्डः 'च'**

**(अनुप्रयुक्त-व्याकरणम्)**

**12.** (क) गुणसन्धेः परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

(ख) तत्पुरुष समासस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

(ग) कर्त्ताकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2



Downloaded from cclchatper.com

**(बहुविकल्पीय-वस्तुनिष्ठप्रश्नाश्च)**

**13.** अधोलिखितदशप्रश्नानां प्रदत्तोत्तर विकल्पेषु शुद्धविकल्पं विचित्य उत्तर-पुस्तिकायां लिखत – $1 \times 10 = 10$

(क) 'श्रेयश्च' इति पदस्य सन्धिविच्छेदोऽस्ति –

(i) श्रेय + च (ii) श्रेयस् + च

(iii) श्रेयस + च (iv) श्रेयः + च

(ख) 'विपत्सु' अत्र का सन्धिः ?

(i) ष्टुत्व (ii) उत्व

(iii) चर्त्व (iv) विसर्ग

(ग) 'सुभारतम्' अत्र कः समासः ?

(i) तत्पुरुषः (ii) अव्ययीभावः

(iii) बहुव्रीहिः (iv) कर्मधारयः

(घ) 'कर्मफलहेतुः' इति पदस्य विग्रहोऽस्ति –

(i) कर्मफलानि हेतुः च (ii) कर्मफलानि हेतुः यस्य सः

(iii) कर्मफलानां हेतुः (iv) कर्मफलाय हेतुः



Downloaded from cclchatper.com

(ङ) 'दर्शितः' इति पदे कः प्रत्ययः ?

(i) वच् + क्तः (ii) शतृ

(iii) णिच् + क्तः (iv) अत्

(च) 'अव + लिप् + क्त' अत्र निष्पन्नम् रूपमस्ति –

(i) अवलिप्तः (ii) आविलप्तः

(iii) अवलीप्तः (iv) अविलप्तः

(छ) 'दूयमानः' इति पदस्य प्रकृति-प्रत्यय-विभागः –

(i) दूय + मानः (ii) दु + शानच

(iii) दूय + वतुप् (iv) दूय + मतुप्

(ज) 'प्रलापेन' इत्यत्र का विभक्तिः ?

(i) द्वितीया (ii) चतुर्थी

(iii) षष्ठी (iv) तृतीया

(झ) 'शरीरम्' इति पदस्य पर्यायवाचिपदं वर्तते –

(i) गात्रम् (ii) कलुषम्

(iii) योगः (iv) हस्तम्



Downloaded from cclchatper.com

(ञ) 'दुष्कृतम्' इति पदस्य विपरीतार्थकपदं वर्तते –

(i) आविष्कृतम् (ii) दूरीकृतम्

(iii) सत्कृतम् (iv) प्रत्याकृतम्

**14.** (क) निर्देशानुसारं रिक्तस्थानपूर्तिं कुरुत – $1 \times 3 = 3$

(i) 'हि + आत्मनः' अत्र निष्पन्नं पदम् ........... अस्ति।

(ii) 'भाग्योदयः' इति पदस्य विग्रहः ............. अस्ति।

(iii) 'नि + शम् + ल्यप्' अत्र सन्धियुक्तपदम् ............. अस्ति।

(ख) अधोलिखितपदानां संस्कृतवाक्येषु प्रयोगः करणीयः – $1 \times 3 = 3$

(i) जनस्य,

(ii) नृपः,

(iii) तमसा।



Downloaded from cclchatper.com

**CLASS : 12th Sr. Sec. (Academic) Code No. 3005**

**Series : SS-M/2016**

*रोल नं०* | | | | | | | | | | | **SET : A**

# संस्कृत

## SANSKRIT

***ACADEMIC***

**2nd SEMESTER**

(Only for Fresh/Re-appear Candidates)

***Evening Session***

*समय : **2½** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **14** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***



Downloaded from cclchatper.com

*निर्देशः–*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**(अपठित-अवबोधनम्)**

**1.** अधोलिखितम् अनुच्छेदं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – $2 \times 4 = 8$

विवेकानन्दस्य जन्म बङ्गप्रान्तस्य कोलकातानगरे 1863 ईसवीये वर्षे जनवरीमासस्य द्वादशे दिने अभवत्। बाल्ये एव सः अत्यन्तचैतन्यवान् अतीव चपलश्च आसीत्। सः ईश्वरविषये ज्ञातुमिच्छति स्म। अयं सर्वान् पृच्छति स्म यत् किं भवान् ईश्वरं दृष्टवान् ? इति ईश्वरं ज्ञातुम् अयं पाश्चात्यदर्शनस्य भारतीयदर्शनस्य चाध्ययनमकरोत्। अनन्तरं परमहंसः रामकृष्णदेवः तस्य गुरुः बभूव।

(क) विवेकानन्दस्य जन्म कुत्राभवत् ?

(ख) बाल्ये सः कीदृशः आसीत् ?

(ग) ईश्वरं ज्ञातुं सः किम करोत् ?

(घ) परमहंसः रामकृष्णदेवः कस्य गुरुः आसीत् ?



Downloaded from cclchatper.com

**खण्डः 'ख'**

**(रचनात्मक-कार्यम्)**

**2.** अधोलिखितेषु निबन्धेषु ***एकमधिकृत्य*** संस्कृतेन लिखत – 8

(क) मम प्रियः कविः,

(ख) वार्षिकोत्सवः,

(ग) स्वच्छतायाः महत्त्वम्।

**खण्डः 'ग'**

**(पठित-अवबोधनम्)**

**3.** अधोलिखितश्लोकस्य हिन्दीभाषायां व्याख्या कार्या – 4

*गिरौ कलापी गगने पयोदो*
*लक्षान्तरेऽर्कश्च जले च पद्मम्।*
*इन्दुर्द्विलक्षे कुमुदस्य बन्धुर्-*
*यो यस्य मित्रं न हि तस्य दूरम् ।।*

**4.** अधोलिखितगद्यांशस्य हिन्दीभाषायां व्याख्या कार्या – 4

निरन्तरम् आत्मोन्नतये चेष्टमानाः लोभाक्रान्त-हृदयाः मनुजन्मानः किल प्रतिक्षणं स्वार्थसाधनाय सर्वात्मना प्रवर्तन्ते। न धर्ममनुधावन्ति, न सत्यमनुबध्नन्ति। परं तृणवद् उपेक्षन्ते स्नेहम् ।



Downloaded from cclchatper.com

**5.** अधोलिखितं गद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – $2 \times 2 = 4$

स स्वल्पभाषी, अतस्तस्य मनःकथा मनोव्यथा वा बोधगम्या नास्ति। सन्तुलितो वार्त्तालापः, साक्षात्समये आगमनम्, ततः सञ्चिकासु मनोनिवेशः, कार्यं समाप्य स्वगृहं प्रत्यागमनञ्च तस्य वैशिष्ट्यमासीत्।

(क) अयं कस्मात् पाठात् उद्धृतः ?

(ख) कस्य मनोव्यथा बोधगम्या नास्ति ?

**6.** अधोलिखितासु ***सूक्तिद्वयस्य*** भावं हिन्दीभाषायां लिखत – $2 \times 2 = 4$

(क) कार्यं वा साधयेयम्, देहं वा पातयेयम् ।

(ख) पृथिव्याः दार्शनिकैः सप्तधा विभागः कृतः, तान् विभागान् सप्त अअक्लिम इति वदन्ति।

(ग) मुखस्य ग्रासो मुख एवाऽभ्राम्यत् अग्रे गन्तु नाशक्नोत्।

**7.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $1 \times 2 = 2$

(क) <u>अस्माभिः</u> पर्वताः शंकवः कृताः।

(ख) लोकाः ! आगच्छत, <u>चौरः</u> प्रविष्टोऽस्ति।



Downloaded from cclchatper.com

## खण्डः 'घ'

## (संस्कृत-साहित्य-परिचयः)

**8.** श्रीभट्टमथुरानाथशास्त्री-पण्डित अम्बिकादत्तव्यासयोः ***एकस्य*** जीवनकृतिविषयकः संक्षिप्तपरिचयः हिन्दीभाषायां लेख्यः। 4

**9.** अधोलिखितेषु कस्यापि ***एकस्य*** संक्षिप्तपरिचयः हिन्दीभाषायां लेख्यः – 4

(i) सिंहासनद्वात्रिंशिका,

(ii) समुद्रसङ्गमः।

## खण्डः 'ङ'

## (छन्दोऽलङ्कार-परिचयः)

**10.** अधोलिखितेषु छन्देषु कयोरपि ***द्वयोः*** लक्षणोदाहरणौ संस्कृतभाषायां लिखत – $4 \times 2 = 8$

(i) शिखरिणी,

(ii) मालिनी,

(iii) वसन्ततिलका।

**11.** अधोलिखितेषु अलङ्कारेषु कयोरपि ***द्वयोः*** लक्षणोदाहरणौ संस्कृतभाषायां लिखत – $4 \times 2 = 8$

(i) अर्थान्तरन्यासः,



Downloaded from cclchatper.com

(ii) उत्प्रेक्षा,

(iii) अन्योक्तिः।

### खण्डः 'च'
### (अनुप्रयुक्त-व्याकरणम्)

**12.** (क) गुणसन्धेः परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

(ख) द्वन्द्वसमासस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

(ग) करणकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**[ बहुविकल्पीय-वस्तुनिष्ठप्रश्नाश्च ]**

**13.** अधोलिखितदशप्रश्नानां प्रदत्तोत्तरविकल्पेषु ***शुद्धविकल्पं*** विचित्य उत्तरपुस्तिकायां लिखत – $1 \times 10 = 10$

(क) 'पित्रोक्तम्' इति पदस्य सन्धिविच्छेदोऽस्ति –

(i) पितृ + उक्तम् (ii) पित्रा + क्त

(iii) पित्रा + उक्तम् (iv) पितृ + क्त

(ख) 'कुर्शीति' अत्र का सन्धिः ?

(i) यण्सन्धिः (ii) अयादिसन्धिः

(iii) गुणसन्धिः (iv) दीर्घसन्धिः

(ग) 'सप्तभेदाः' अत्र कः समासः ?

(i) तत्पुरुषः (ii) बहुव्रीहिः

(iii) अव्ययीभावः (iv) द्विगुः



Downloaded from cclchatper.com

(घ) 'वृक्षशाखाः' इति पदस्य विग्रहोऽस्ति –

(i) वृक्षाः शाखाः (ii) वृक्षात् शाखाः

(iii) वृक्षाणां शाखाः (iv) वृक्षः शाखाः

(ङ) 'दत्तवान्' इति पदे कः प्रत्ययः ?

(i) शतृ (ii) शानच्

(iii) क्तवतु (iv) क्त्वा

(च) 'निर् + मुच् + ल्यप्' अत्र निष्पन्नं रूपमस्ति –

(i) निर्मुच्य (ii) निमुचः

(iii) निर्मोचय (iv) निर्मुचय

(छ) 'आघातः' इति पदस्य प्रकृति-प्रत्यय-विभागः –

(i) आ + घा + क्त (ii) आ + घातः

(iii) आ + घा + क्त्वा (iv) आ + हन् + क्त

(ज) 'आकलनात्' इत्यत्र का विभक्तिः ?

(i) सप्तमी (ii) षष्ठी

(iii) पञ्चमी (iv) तृतीया

(झ) 'मम' इत्यस्य पदपरिचयः अस्ति –

(i) अस्मद् + प्रथमा + एकवचनम्

(ii) अस्मद् + द्वितीया + एकवचनम्

(iii) अस्मद् + पञ्चमी + एकवचनम्

(iv) अस्मद् + षष्ठी + एकवचनम्



Downloaded from cclchatper.com

(ञ) 'सुरक्षितः' इति पदस्य विपरीतार्थकपदं वर्तते –

(i) असुरक्षितः (ii) रक्षितः

(iii) अवरक्षितः (iv) संरक्षितः

**14.** (क) निर्देशानुसारं रिक्तस्थानपूर्तिं कुरुत – $1 \times 3 = 3$

(i) 'किल + एकः + अधिकारी' अत्र सन्धियुक्तपदम् .............. अस्ति।

(ii) 'व्यवहारकुशलः' इति पदस्य समासविग्रहः .............. अस्ति।

(iii) 'सम् + चि + क्त' अत्र निष्पन्नं पदम् .............. अस्ति।

(ख) अधोलिखितपदानां संस्कृतवाक्येषु प्रयोगः करणीयः –$1 \times 3 = 3$

(i) कदापि,

(ii) गन्तुम्,

(iii) प्रकटयति



Downloaded from cclchatper.com

**CLASS : 12th Sr. Sec. (Academic) Code No. 2905**

**Series : SS-M/2016**

*रोल नं०* | | | | | | | | | | | **SET : B**

# संस्कृत

# SANSKRIT

***ACADEMIC***

**1st SEMESTER**

(Only for Re-appear Candidates)

***( Morning Session )***

*समय : **2½** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **14** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***



Downloaded from cclchatper.com

***निर्देश :–***

*(i) प्रत्येकं खण्डमधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**(अपठित-अवबोधनम्)**

**1.** अधोलिखितम् अनुच्छेदं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – $2 \times 4 = 8$

योगिनः कर्मसु कुशलः भवन्ति। कृष्णस्तु योगिनां मूर्धन्यभूतः मन्यते। युद्धक्षेत्रे, एकदा कर्णेन, युधिष्ठिरः क्षतविक्षतः कृतः। इमं समाचारं श्रुत्वा, चिन्तितः अर्जुनः सत्वरं युधिष्ठिरं प्रति जगाम पप्रच्छ च तस्य कुशलक्षेमादिकम्। युधिष्ठिरः ससंरम्भं अर्जुनं प्रति एवं चुक्रोशरे – ' रे अर्जुन ! त्वं युद्धस्थले कर्णं अजित्वेव मम क्षेमादिकं पृच्छन् कथं न लज्जसे।' 'धिक् त्वां तव च गाण्डीवम्' इति।

(क) कर्मसु कुशलः के भवन्ति ?

(ख) कः योगिनां मूर्धन्यभूतः मन्यते ?

(ग) कर्णेन कुत्र युधिष्ठिरः क्षतविक्षतः कृतः ?

(घ) चिन्तितः अर्जुनः कं प्रति जगाम ?



Downloaded from cclchatper.com

**खण्डः 'ख'**

**(रचनात्मक-कार्यम्)**

**2.** अधोलिखितेषु निबन्धेषु एकमधिकृत्य संस्कृतेन लिखत – 8

(क) अनुशासनम्

(ख) प्रातःकाल भ्रमणम्

(ग) दायजस्य कुप्रथा

**खण्डः 'ग'**

**(पठित-अवबोधनम्)**

**3.** अधोलिखितगद्यांशस्य हिन्दीभाषायां व्याख्या कार्या – 4

ननु मूर्खाः ! पठितमेव हि युष्माभिरपि तत्थाण्डम् । किं न पश्यथ ? प्रत्येकं शतसंख्याः कवचिनो दण्डिनो निषङ्गिणश्च रक्षितारः। यदि च विप्रत्ययस्तत्पृच्छत।

**4.** अधोलिखितश्लोकस्य हिन्दीभाषायां व्याख्या कार्या – 4

समाप्तविद्येन मया महर्षिर्विज्ञापितोऽभूद्गुरुदक्षिणायै।<br>
स मे चिरायास्खलितोपचारां तां भक्तिमेवागणयत्पुरस्तात् ।।



Downloaded from cclchatper.com

**5.** अधोलिखितं गद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि सम्पूर्णवाक्येन लिखत – $2 \times 2 = 4$

अपगतमले हि मनसि विशन्ति सुखेनोपदेशगुणाः। हरति अतिमलिनमपि दोषजातं गुरूपदेशः गुरूपदेशश्च नाम अखिलमलप्रक्षालनक्षमम् अजलं स्नानम् ?

(क) अयं गद्यांशः कस्मात् पाठात् संकलितः ?

(ख) कीदृशे मनसि उपदेशगुणाः प्रविशन्ति ?

**6.** अधोलिखितासु सूक्तिद्वयस्य भावं हिन्दीभाषायां लिखत – $2 \times 2 = 4$

(क) तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्।

(ख) वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते।

(ग) न च सन्न्यसनादेव सिद्धिं समधिगच्छति।

**7.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $1 \times 2 = 2$

(क) सहसा विदधीत न क्रियामविवेकः।

(ख) विभूषणं मौनमपण्डितानाम् ।

**खण्डः 'घ'**

**(संस्कृत-साहित्य-परिचयः)**

**8.** भतृहरि-बाणयोः एकस्य जीवनकृतिविषयकः संक्षिप्तपरिचयः हिन्दीभाषायां लेख्यः। 4



Downloaded from cclchatper.com

**9.** अधोलिखितेषु कस्यापि एकस्य संक्षिप्तपरिचयः हिन्दीभाषायां देयः – 4

(i) उत्तररामचरितम्,

(ii) कादम्बरी।

**खण्डः 'ङ'**

**(छन्दोऽलङ्कार-परिचयः)**

**10.** अधोलिखितेषु छन्देषु कयोरपि ***द्वयोः*** लक्षणोदाहरणौ संस्कृतभाषायां लिखत – $4 \times 2 = 8$

(i) इन्द्रवज्रा,

(ii) वंशस्थः,

(iii) उपेन्द्रवज्रा।

**11.** अधोलिखितेषु अलङ्कारेषु कयोरपि ***द्वयोः*** लक्षणोदाहरणौ संस्कृतभाषायां लिखत – $4 \times 2 = 8$

(i) उत्प्रेक्षा,

(ii) रूपकः,

(iii) अनुप्रासः।



Downloaded from cclchatper.com

**खण्डः 'च'**

**(अनुप्रयुक्त-व्याकरणम्)**

**12.** (क) अयादिसन्धेः परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

(ख) कर्मधारय समासस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

(ग) अधिकरणकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**(बहुविकल्पीय-वस्तुनिष्ठप्रश्नाश्च)**

**13.** अधोलिखितदशप्रश्नानां प्रदत्तोत्तरविकल्पेषु शुद्धविकल्पं विचित्य उत्तर-पुस्तिकायां लिखत – $1 \times 10 = 10$

(क) 'विद्ययाऽमृतम्' इति पदस्य सन्धिविच्छेदोऽस्ति —

(i) विद्या + अमृतम् (ii) विद्यया + अमृतम्

(iii) विद्ययो + अमृतम् (iv) विद्या + ऽमृतम्

(ख) 'उल्लेख' अत्र का सन्धिः ?

(i) विसर्गः (ii) चर्त्वः

(iii) ष्टुत्वः (iv) उत्वः

(ग) 'प्रत्यक्षरम्' अत्र कः समासः ?

(i) अव्ययीभावः (ii) तत्पुरुषः

(iii) बहुव्रीहिः (iv) कर्मधारयः



Downloaded from cclchatper.com

(घ) 'सर्वकर्माणि' इति पदस्य विग्रहोऽस्ति –

(i) सर्व च कर्माणि च (ii) सर्वाणि च तानि कर्माणि

(iii) सर्वेषु कर्मणि (iv) सर्वेषाम् कर्मणि

(ङ) 'प्रच्छन्नः' इति पदे कः प्रत्ययः ?

(i) प्रच्छ् + क्तः (ii) प्रच्छ् + शतृ

(iii) प्र + छद् + क्तः (iv) प्रच्छम् + क्तः

(च) परि + क्लिश् + क्तः' अत्र निष्पन्नं रूपमस्ति –

(i) परिक्लिप्तः (ii) परिक्लिष्टः

(iii) परिक्लिक्तः (iv) परिक्लिशः

(छ) 'प्रेषितः' इति पदस्य प्रकृति-प्रत्यय-विभागः –

(i) प्र + इष + क्तः (ii) प्र + इष् + क्तः

(iii) प्र + ईष + शतृ (iv) प्र + ईश् + शतृ

(ज) 'तेषु' इत्यत्र का विभक्तिः ?

(i) तृतीया (ii) सप्तमी

(iii) षष्ठी (iv) पंचमी

(झ) 'सततम्' इति पदस्य पर्यायवाचिपदं वर्तते -

(i) मस्तम् (ii) अश्रान्तम्

(iii) हीनम् (iv) हततम्



Downloaded from cclchatper.com

(ञ) 'निकृष्टः' इति पदस्य विपरीतार्थकपदं वर्तते –

(i) उत्कृष्टः (ii) प्रकृष्टः

(iii) सत्कृष्टः (iv) मत्कृष्टः

**14.** (क) निर्देशानुसारं रिक्तस्थानपूर्तिं कुरुत – 1 × 3 = 3

(i) 'निर् + गम् + लटलकार + प्रथमपुरुष एकवचनस्य रूपमस्ति .............. ।

(ii) 'मध्यान्तरः' इति पदस्य विग्रहः .............. अस्ति।

(iii) 'कर्मणि + एव्' अत्र सन्धियुक्तपदम् .............. अस्ति।

(ख) अधोलिखितपदानां संस्कृतवाक्येषु प्रयोगः करणीयः – 1 × 3 = 3

(i) उक्त्वा

(ii) वृष्टिः

(iii) प्रविशन्ति



Downloaded from cclchatper.com

**CLASS : 12th Sr. Sec. (Academic) Code No. 3005**

**Series : SS-M/2016**

*रोल नं०* | | | | | | | | | | | **SET : B**

# संस्कृत

## SANSKRIT

***ACADEMIC***

**2nd Semester**

(Only for Fresh/Re-appear Candidates)

***Evening Session***

*समय : **2½** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **14** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***



Downloaded from cclchatper.com

*निर्देशः–*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**(अपठित-अवबोधनम्)**

**1.** अधोलिखितम् अनुच्छेदं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – $2 \times 4 = 8$

संन्यासदीक्षानन्तरं नरेन्द्रस्य नाम विवेकानन्दः इति अभवत्। सः त्रिनवत्यधिकाष्टादशतमे वर्षे अमेरिकादेशस्य शिकागो-नगरे विश्वधर्म-सम्मेलने भारतस्य गौरवं प्रतिष्ठापितवान् । विदेशेषु वेदान्तधर्मस्य प्रचारं कृत्वा भारतं प्रत्यागतः सः देशोद्धाराय युवकान् प्रेरितवान्। 'रामकृष्णमिशन' इति संस्थां संस्थाप्य जनेषु शक्तिजागरणं कृतवान्।

(क) नरेन्द्रः विवेकानन्दः इति नाम कदा प्राप्तवान् ?

(ख) सः कुत्र भारतस्य गौरवं प्रतिष्ठापितवान् ?

(ग) सः युवकान् किमर्थं प्रेरितवान् ?

(घ) रामकृष्णमिशनस्य संस्थापकः कः आसीत् ?



Downloaded from cclchatper.com

**खण्डः 'ख'**

**(रचनात्मक-कार्यम्)**

**2.** अधोलिखितेषु निबन्धेषु ***एकमधिकृत्य*** संस्कृतेन लिखत – 8

(क) मम प्रियं पुस्तकम् – रामायणम्,

(ख) महात्मागान्धी,

(ग) यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।

**खण्डः 'ग'**

**(पठित-अवबोधनम्)**

**3.** अधोलिखितश्लोकस्य हिन्दीभाषायां व्याख्या कार्या – 4

*ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति।*
*भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम्।।*

**4.** अधोलिखितगद्यांशस्य हिन्दीभाषायां व्याख्या कार्या – 4

मानवा नाम सर्वासु सृष्टिधारासु निकृष्टतमा सृष्टिः, जीवसृष्टिप्रवाहेषु मानवा इव पर – प्रतारकाः स्वार्थसाधनपरा मायाविनः कपट-व्यवहारकुशलाः हिंसानिरताः जीवाः न विद्यन्ते।



Downloaded from cclchatper.com

**5.** अधोलिखितं गद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – $2 \times 2 = 4$

तावदकस्मादुत्थितो महान् झञ्झावातः, एकः सायंसमयप्रयुक्तः स्वभाववृत्तोऽन्धकारः, स च द्विगुणितो मेघमालाभिः। झञ्झावातोद्धूतैः रेणुभिः शीर्णपत्रैः कुसुमरागैः शुष्कपुष्पैश्च पुनरेष द्वैगुण्यं प्राप्तः।

(क) अयं गद्यांशः कस्मात् पाठात् उद्धृतः ?

(ख) सायंसमयान्धकारः काभिः द्विगुणितो बभूव ?

**6.** अधोलिखितासु ***सूक्तिद्वयस्य*** भावं हिन्दीभाषायां लिखत – $2 \times 2 = 4$

(क) यो जन्म दत्तवान्, स जीवितुमधिकारमपि दत्तवान्।

(ख) वृक्षाः लेखनी भवेयुः समुद्रोऽपि मसी भवेत्, परं भगवद्वाक्यानि समाप्तानि न भवन्ति।

(ग) 'किन्तो' कारणात् कस्मिन्नपि कार्ये सफलता दुर्घटास्ति।

**7.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $1 \times 2 = 2$

(क) एवं चतुर्णां परस्परं <u>विवादो</u> लग्नः।

(ख) परं दृढ़सङ्कल्पोऽयं सादी न <u>स्वकार्याद्</u> विरमति।



Downloaded from cclchatper.com

**खण्डः 'घ'**

**(संस्कृत-साहित्य-परिचयः)**

**8.** श्रीदाराशिकोह-पण्डितहृशीकेशभट्टाचार्ययोः ***एकस्य*** जीवनकृतिविषयकः संक्षिप्तपरिचयः हिन्दीभाषायां लेख्यः। 4

**9.** अधोलिखितेषु कस्यापि ***एकस्य*** संक्षिप्तपरिचयः हिन्दीभाषायां लेख्यः – 4

(i) प्रबन्धमञ्जरी,

(ii) शिवराजविजयः।

**खण्डः 'ङ'**

**(छन्दोऽलङ्कार-परिचयः)**

**10.** अधोलिखितेषु छन्देषु कयोरपि ***द्वयोः*** लक्षणोदाहरणौ संस्कृतभाषायां लिखत – $4 \times 2 = 8$

(i) शार्दूलविक्रीडितम्,

(ii) मन्दाक्रान्ता,

(iii) वसन्ततिलका।

**11.** अधोलिखितेषु अलङ्कारेषु कयोरपि ***द्वयोः*** लक्षणोदाहरणौ संस्कृतभाषायां लिखत – $4 \times 2 = 8$

(i) श्लेषः,



Downloaded from cclchatper.com

(ii) व्याजस्तुतिः,

(iii) अतिशयोक्तिः।

**खण्डः 'च'**

**(अनुप्रयुक्त-व्याकरणम्)**

**12.** (क) यण्सन्धेः परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

(ख) अव्ययीभावसमासस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

(ग) कर्ताकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**[ बहुविकल्पीय-वस्तुनिष्ठप्रश्नाश्च ]**

**13.** अधोलिखितदशप्रश्नानां प्रदत्तोत्तरविकल्पेषु ***शुद्धविकल्पं*** विचित्य उत्तरपुस्तिकायां लिखत — $1 \times 10 = 10$

(क) 'भार्ययोक्तम्' इति पदस्य सन्धिविच्छेदोऽस्ति —

(i) भार्यया + उक्तम् (ii) भार्या + उक्तम्

(iii) भार्य + योक्तम् (iv) भार्य + उक्तम्

(ख) 'निजकार्यान्न' अत्र का सन्धिः ?

(i) स्वरसन्धिः (ii) व्यञ्जनसन्धिः

(iii) विसर्गसन्धिः (iv) अयादिसन्धिः



Downloaded from cclchatper.com

(ग) 'प्रतिक्षणम्' अत्र कः समासः ?

(i) तत्पुरुषः　　(ii) अव्ययीभावः

(iii) द्विगुः　　(iv) बहुव्रीहिः

(घ) 'पर्वतश्रेणी' इति पदस्य विग्रहोऽस्ति –

(i) पर्वते श्रेणीः　　(ii) पर्वतात् श्रेणीः

(iii) पर्वतानां श्रेणीः　　(iv) पर्वतेषु श्रेणीः

(ङ) 'कथयित्वा' इति पदे कः प्रत्ययः ?

(i) क्त्वा　　(ii) क्त

(iii) ल्यप्　　(iv) शतृ

(च) 'प्र + विश् + क्त' अत्र निष्पन्नं रूपमस्ति –

(i) प्रविशः　　(ii) प्रवेशः

(iii) प्रविष्टः　　(iv) प्रवेश्य

(छ) 'निलीनः' इति पदस्य प्रकृति-प्रत्यय-विभागः –

(i) नि + लीनः　　(ii) नि + ली + क्त

(iii) नि + ली + नञ्　　(iv) नि + ली + शतृ

(ज) 'हरितेन' इत्यत्र का विभक्तिः ?

(i) प्रथमा　　(ii) द्वितीया

(iii) पञ्चमी　　(iv) तृतीया



Downloaded from cclchatper.com

(झ) 'मया' इत्यस्य पदपरिचयः अस्ति –

(i) अस्मद् + द्वितीया + एकवचनम्

(ii) अस्मद् + तृतीया + एकवचनम्

(iii) अस्मद् + चतुर्थी + एकवचनम्

(iv) अस्मद् + पञ्चमी + एकवचनम्

(ञ) 'पर्वतः' इति पदस्य समानार्थकपदं वर्तते –

(i) अचलः (ii) अनलः

(iii) अनिलः (iv) अञ्चलः

**14.** (क) निर्देशानुसारं रिक्तस्थानपूर्तिं कुरुत – $1 \times 3 = 3$

(i) 'मम + उच्चकुलम्' अत्र सन्धियुक्तपदम् ........ अस्ति।

(ii) 'हिंसानिरताः' इति पदस्य समासविग्रहः ........ अस्ति।

(iii) 'सम् + आ + गम् + क्त' अत्र निष्पन्नं पदम् ........ अस्ति।

(ख) अधोलिखितपदानां संस्कृतवाक्येषु प्रयोगः करणीयः – $1 \times 3 = 3$

(i) कृतवान्,

(ii) मनोहरः,

(iii) अहो।



Downloaded from cclchatper.com

**CLASS : 12th Sr. Sec. (Academic)** **Code No. 2905**

**Series : SS-M/2016**

*रोल नं०* | | | | | | | | | | |

***SET : C***

# संस्कृत

# SANSKRIT

***ACADEMIC***

**1st SEMESTER**

(Only for Re-appear Candidates)

***( Morning Session )***

*समय : **2½** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **14** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***



Downloaded from cclchatper.com

*निर्देश :–*

*(i) प्रत्येकं खण्डमधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**(अपठित-अवबोधनम्**

**1.** अधोलिखितम् अनुच्छेदं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – $2 \times 4 = 8$

विश्वस्य कल्याणकारिणी संस्कृतभाषा भारतस्य तु वस्तुतः एव आत्मा अस्ति। अस्यां भाषायां विद्यमानं आध्यात्मिकं ज्ञानं विना भारत मात्र प्राकृतजन समूहः एव। तर्हि को विशेष भारतीये अन्य देशीये च जने ? संस्कृत सुरभिशून्यं भारत समायोजितेष्वपि विविधेषु अन्येषु अलङ्करणेषु कर्गदनिर्मितं कृत्रिमं कुसुममिव नैव शोभिष्यते पूर्ववत्।

(क) भारतस्य आत्मा कीदृशी अस्ति ?

(ख) कं विना भारत मात्र प्राकृतजनसमूहः एव ?

(ग) कस्य शून्यं भारत नैव शोभिष्यते पूर्ववत् ?

(घ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।



Downloaded from cclchatper.com

**खण्डः 'ख'**

**(रचनात्मक-कार्यम्)**

**2.** अधोलिखितेषु निबन्धेषु एकमधिकृत्य संस्कृतेन लिखत – 8

(क) पुस्तकालयः,

(ख) समयस्य सदुपयोगः,

(ग) संस्कृतभाषायाः महत्त्वम्।

**खण्डः 'ग'**

**(पठित-अवबोधनम्)**

**3.** अधोलिखितगद्यांशस्य हिन्दीभाषायां व्याख्या कार्या – 4

इदमेव च पुनः पुनरभिधीयसे-विद्वांसमपि सचेतसमपि, महासत्त्वमपि, अभिजातमपि, धीरमपि, प्रयत्नवन्तमपि पुरुषं दुर्विनीता खलीकरोति लक्ष्मीरित्येतावदभिधायोपशशाम्।

**4.** अधोलिखितश्लोकस्य हिन्दीभाषायां व्याख्या कार्या – 4

निर्बन्धसञ्जातरुषार्थकार्श्यमचिन्तयित्वा गुरुणाहमुक्तः।
वित्तस्य विद्या परिसंख्यया मे कोटीश्चतस्रो दश चाहरेति।।



Downloaded from cclchatper.com

**5.** अधोलिखितं गद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि सम्पूर्णवाक्येन लिखत – $2 \times 2 = 4$

सुलभसौख्यमिदानीं बालत्वं भवति। अहो, एतेषां मध्ये क एष रामभद्रस्य मुग्धललितैरङ्गैर्दारकोऽस्माकं लोचने शीतलयति ?

(क) अयं गद्यांशः कस्मात् पाठात् संकलितः ?

(ख) बालत्वं कीदृशं भवति ?

**6.** अधोलिखितासु सूक्तिद्वयस्य भावं हिन्दीभाषायां लिखत – $2 \times 2 = 4$

(क) एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।

(ख) यशसि चाभिरूचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हिमहात्मनाम्।

(ग) स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।

**7.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $1 \times 2 = 2$

(क) नाशयति च <u>पुरुषमत्यासङ्गो विषयेषु</u>।

(ख) अतिजवेन दूरमतिक्रान्तः <u>स चपलः</u> दृश्यते।

**खण्डः 'घ'**

**(संस्कृत-साहित्य-परिचयः)**

**8.** बाण-जगन्नाथयोः ***एकस्य*** जीवनकृतिविषयकः संक्षिप्तपरिचयः हिन्दीभाषायां लेख्यः। 4



Downloaded from cclchatper.com

**9.** अधोलिखितेषु कस्यापि **एकस्य** संक्षिप्तपरिचयः हिन्दीभाषायां देयः – 4

(i) हर्षचरितम्,

(ii) श्रीमद्भगवद्गीता।

**खण्डः 'ङ'**

**(छन्दोऽलङ्कार-परिचयः)**

**10.** अधोलिखितेषु छन्देषु कयोरपि ***द्वयोः*** लक्षणोदाहरणौ संस्कृतभाषायां लिखत – $4 \times 2 = 8$

(i) वंशस्थः,

(ii) उपजातिः,

(iii) अनुष्टुप्।

**11.** अधोलिखितेषु अलङ्कारेषु कयोरपि ***द्वयोः*** लक्षणोदाहरणौ संस्कृतभाषायां लिखत – $4 \times 2 = 8$

(i) यमकः,

(ii) अनुप्रासः,

(iii) उपमा।

**खण्डः 'च'**

**(अनुप्रयुक्त-व्याकरणम्)**

**12.** (क) वृद्धिसन्धेः परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2



Downloaded from cclchatper.com

(ख) 'बहुव्रीहिः' समासस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

(ग) अपादानकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**(बहुविकल्पीय-वस्तुनिष्ठप्रश्नाश्च)**

**13.** अधोलिखितदशप्रश्नानां प्रदत्तोत्तरविकल्पेषु शुद्धविकल्पं विचित्य उत्तर-पुस्तिकायां लिखत – $1 \times 10 = 10$

(क) 'समुद्रेऽस्तम्' इति पदस्य सन्धिविच्छेदोऽस्ति —

(i) समुद्रे + अस्तम् (ii) समुद्रे + ऽस्तम्

(iii) समुद्रे + आस्तम् (iv) समुद्रे + एऽस्तम्

(ख) 'निष्फलः' अत्र का सन्धि ?

(i) दीर्घः (ii) विसर्गः

(iii) चर्त्वः (iv) स्वरसन्धिः

(ग) 'सचक्रम्' अत्र कः समासः ?

(i) अव्ययीभावः (ii) तृतीयतत्पुरुषः

(iii) बहुव्रीहिः (iv) कर्मधारयः



Downloaded from cclchatper.com

(घ) 'लोकसंग्रहम्' इति पदस्य विग्रहोऽस्ति –

(i) लोके संग्रहम् (ii) लोकस्य संग्रहम्

(iii) लोकेषु संग्रहम् (iv) लोकाय संग्रहम्

(ङ) 'उत्तीर्णः' इति पदे कः प्रत्ययः ?

(i) उत् + र्ता + क्तः (ii) उत् + तीर्णः

(iii) उत् + तृ + क्तवतु (iv) उत् + त्रि + क्तः

(च) 'कृ + क्तवतु' अत्र निष्पन्नम् रूपमस्ति –

(i) क्रतव्यः (ii) कृतव्यः

(iii) कृतवत् (iv) करितव्यः

(छ) 'स्थातुम्' इति पदस्य प्रकृति-प्रत्यय-विभागः –

(i) स्थ + तुमुन् (ii) स्था + तुम्

(iii) स्था + तुमुन् (iv) तिष्ठ + तुम्

(ज) 'पापात्' इत्यत्र का विभक्तिः ?

(i) द्वितीया (ii) चतुर्थी

(iii) सप्तमी (iv) पंचमी

(झ) 'बुद्धिः' इति पदस्य पर्यायवाचिपदं वर्तते –

(i) तीक्ष्णः (ii) मतिः

(iii) बद्धः (iv) योगः



Downloaded from cclchatper.com

(ञ) 'बुद्धिहीनः' इति पदस्य विपरीतार्थकपदं वर्तते –

(i) बुद्धियुक्तः (ii) बुद्धिरिक्तः

(iii) बुद्धिमुक्तः (iv) बुद्धिदृष्टः

**14.** (क) निर्देशानुसारं रिक्त स्थानपूर्तिं कुरुत – $1 \times 3 = 3$

(i) 'उप + गम् + लट्लकार + प्रथमपुरुष एकवचनस्य, रूपमस्ति .............. ।

(ii) 'कर्मकुशलः' इति पदस्य विग्रहः .............. अस्ति।

(iii) ' यत् + यत् + आचरति' अत्र सन्धियुक्तपदम् .............. अस्ति।

(ख) अधोलिखितपदानां संस्कृतवाक्येषु प्रयोगः करणीयः –$1 \times 3 = 3$

(i) भूयः,

(ii) धीराणाम्,

(iii) धनम्।



Downloaded from cclchatper.com

**CLASS : 12th Sr. Sec. (Academic) Code No. 3005**

**Series : SS-M/2016**

*रोल नं०* | | | | | | | | | | |  **SET : C**

# संस्कृत

## SANSKRIT

***ACADEMIC***

**2nd SEMESTER**

(Only for Fresh/Re-appear Candidates)

***Evening Session***

*समय : **2½** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **14** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/ पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***



Downloaded from cclchatper.com

*निर्देशः–*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

## खण्डः 'क'

### (अपठित-अवबोधनम्)

**1.** अधोलिखितम् अनुच्छेदं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – $2 \times 4 = 8$

विवेकानन्दः अमेरिकादेशे विश्वधर्मसभायां भारतीयसंस्कृतेः उपादेयतां श्रेष्ठतां च प्रादर्शयत्। तत्र सभास्थले विविधाः धर्मग्रन्थाः एकस्योपरि एकः इति रूपेण स्थापिता आसन्। संयोगवशात् श्रीमद्भगवद्गीता सर्वेषां पुस्तकानाम् अधः आसीत्। एकः अमेरिकावासी उपहासपूर्वकम् अवदत्–स्वामिन् ! भवतां गीता सर्वेषां धर्मग्रन्थानाम् अधः वर्तते इति। प्रत्युत्पन्नमतिः स्वामीविवेकानन्दः हसन्नेव प्रत्यवदत् – आम् ! सत्यम्। आधारशिला तु अधः एव भवति। सा यदि बहिः स्वीक्रियेत तर्हि समग्रम् अधः पतिष्यति। इति निशम्य सः तूष्णीमभवत्।

(क) विवेकानन्दः कस्मिन् देशे भारतीयसंस्कृतेः श्रेष्ठतां प्रादर्शयत् ?

(ख) अस्माकं धर्मग्रन्थः 'श्रीमद्भगवद्गीता' कुत्र आसीत् ?

(ग) अमेरिकावासी विवेकानन्दम् उपहासपूर्वकं किमवदत् ?

(घ) विवेकानन्दः अमेरिकावासिनं किं प्रत्यवदत् ?



Downloaded from cclchatper.com

## खण्डः 'ख'

## (रचनात्मक-कार्यम्)

**2.** अधोलिखितेषु निबन्धेषु ***एकमधिकृत्य*** संस्कृतेन लिखत – 8

(क) गणतन्त्रदिवसः,

(ख) मम प्रियः कविः,

(ग) स्वच्छतायाः महत्त्वम्।

## खण्डः 'ग'

## (पठित–अवबोधनम्)

**3.** अधोलिखितश्लोकस्य हिन्दीभाषायां व्याख्या कार्या – 4

*उपार्जितानां वित्तानां त्याग एव हि रक्षणम्।*
*तटाकोदरसंस्थानां परीवाह इवाम्भसाम्।।*

**4.** अधोलिखितगद्यांशस्य हिन्दीभाषायां व्याख्या कार्या – 4

अथाकस्मात् परितो मेघमाला पर्वतश्रेणीव प्रादुरभूत्, क्षणं सूक्ष्मविस्तारा, परतः प्रकटित-शिखरि-शिखर-विडम्बना, अथ दर्शित-दीर्घ-शुण्डमण्डित-दिगन्तदन्तावल-भयानकाकारा ततः पारस्परिकसंश्लेष-विहित-महान्धकारा च समस्तं गगनतलं पर्यच्छदीत्।



Downloaded from cclchatper.com

**5.** अधोलिखितं गद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – $2 \times 2 = 4$

तस्य गमनस्य दिवसत्रयात्परं कार्यालये पत्रमेकमागतम्। कौतूहलवशात् श्रीदासः तत्पत्रमुद्घाटितवान्। लेखिका आसीत् सुश्री मेरी यस्याः पार्श्वे सः प्रतिमासमर्धाधिकं धनं धनादेशेन प्रेषयति स्म।

(क) कार्यालये कति दिवसात् परं पत्रम् आगतम् ?

(ख) पत्रस्य लेखिका का आसीत् ?

**6.** अधोलिखितासु ***सूक्तिद्वयस्य*** भावं हिन्दीभाषायां लिखत – $2 \times 2 = 4$

(क) स्वर्गभूमिं कुर्शीति वदन्ति।

(ख) मानवा नाम सर्वासु सृष्टिधारासु निकृष्टतमा सृष्टिः।

(ग) कदाचित् अयं क्रूरः 'किन्तुः' मुखस्य कवलमप्याच्छिनत्ति।

**7.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $1 \times 2 = 2$

(क) मासोऽयमाषाढः, अस्ति च सायं <u>समयः</u>।

(ख) <u>तस्याः</u> दार्शनिकैः सप्तधा विभागः कृतः।



Downloaded from cclchatper.com

## खण्डः 'घ'

## (संस्कृत-साहित्य-परिचयः)

**8.** श्रीदाराशिकोह-श्रीचन्द्रशेखरवर्मयोः ***एकस्य*** जीवनकृतिविषयकः संक्षिप्तपरिचयः हिन्दीभाषायां लेख्यः। 4

**9.** अधोलिखितेषु कस्यापि ***एकस्य*** संक्षिप्तपरिचयः हिन्दीभाषायां लेख्यः – 4

(i) शिवराजविजयः,

(ii) प्रबन्धमञ्जरी।

## खण्डः 'ङ'

## (छन्दोऽलङ्कार-परिचयः)

**10.** अधोलिखितेषु छन्देषु कयोरपि ***द्वयोः*** लक्षणोदाहरणौ संस्कृतभाषायां लिखत – $4 \times 2 = 8$

(i) शिखरिणी,

(ii) शार्दूलविक्रीडितम्,

(iii) मालिनी।

**11.** अधोलिखितेषु अलङ्कारेषु कयोरपि ***द्वयोः*** लक्षणोदाहरणौ संस्कृतभाषायां लिखत – $4 \times 2 = 8$

(i) उत्प्रेक्षा,



Downloaded from cclchatper.com

(ii) अतिशयोक्ति,

(iii) व्याजस्तुतिः।

**खण्डः 'च'**

**(अनुप्रयुक्त-व्याकरणम्)**

**12.** (क) दीर्घसन्धेः परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

(ख) तत्पुरुषसमासस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

(ग) अपादानकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**[ बहुविकल्पीय-वस्तुनिष्ठप्रश्नाश्च ]**

**13.** अधोलिखितदशप्रश्नानां प्रदत्तोत्तर विकल्पेषु ***शुद्धविकल्पं*** विचित्य उत्तरपुस्तिकायां लिखत – $1 \times 10 = 10$

(क) 'असारोऽयम्' इति पदस्य सन्धिविच्छेदोऽस्ति –

(i) असारो + यम् (ii) असारो + अयम्

(iii) असारः + अयम् (iv) अ + सारोऽयम्

(ख) 'चत्वार्यपि' अत्र का सन्धिः ?

(i) यण्सन्धिः (ii) दीर्घसन्धिः

(iii) अयादिसन्धिः (iv) गुणसन्धिः

(ग) 'मनःकथा' अत्र कः समासः ?

(i) तत्पुरुषः (ii) अव्ययीभावः

(iii) द्वन्द्वः (iv) द्विगुः



Downloaded from cclchatper.com

(घ) 'मित्रगोष्ठी' इति पदस्य विग्रहोऽस्ति –

(i) मित्रेषु गोष्ठी (ii) मित्राणां गोष्ठी

(iii) मित्रान् गोष्ठी (iv) मित्रे गोष्ठी

(ङ) 'संपोष्य' इति पदे कः प्रत्ययः ?

(i) क्त्वा (ii) यत्

(iii) शतृ (iv) ल्यप्

(च) 'नि + युज् + क्तवतु' अत्र निष्पन्नं रूपमस्ति –

(i) नियुक्तवान् (ii) नियोगवान्

(iii) नियुक्तः (iv) नियोगः

(छ) 'आक्रीडनम्' इति पदस्य प्रकृति-प्रत्यय-विभागः –

(i) आ + क्रीड् + शतृ (ii) आ + क्रीड् + ल्युट्

(iii) आ + क्रीड् + शानच् (iv) आ + क्रीड् + ल्यप्

(ज) 'बालिकायाः' इत्यत्र का विभक्तिः ?

(i) षष्ठी (ii) सप्तमी

(iii) द्वितीया (iv) चतुर्थी

(झ) 'तस्य' इत्यस्य पदपरिचयः अस्ति –

(i) तत् + प्रथमा + बहुवचनम्

(ii) तत् + षष्ठी + एकवचनम्

(iii) तत् + चतुर्थी + एकवचनम्

(iv) तत् + पञ्चमी + बहुवचनम्



Downloaded from cclchatper.com

(ञ) 'आशा' इति पदस्य विपरीतार्थकपदं वर्तते –

(i) आकांक्षा (ii) निराशा

(iii) निराकांक्षा (iv) साकांक्षा

**14.** (क) निर्देशानुसारं रिक्तस्थानपूर्तिं कुरुत – $1 \times 3 = 3$

(i) 'सु + अल्पभाषी' अत्र सन्धियुक्तपदम् ........ अस्ति।

(ii) 'प्रतिक्षणम्' इति पदस्य समासविग्रहः .......... अस्ति।

(iii) 'वि + लिख् + ल्यप्' अत्र निष्पन्नं पदम् ........ अस्ति।

(ख) अधोलिखितपदानां संस्कृतवाक्येषु प्रयोगः करणीयः – $1 \times 3 = 3$

(i) श्रूयते,

(ii) त्वाम्,

(iii) प्रायः।



Downloaded from cclchatper.com